॥ श्री गणेशाय नमः ॥

# अथ श्री महालक्ष्मी पंचोपचार पूजनम्

## ध्यानम्

**( हाथ में अक्षत, पुष्प लेकर ध्यान करें )**

**ॐ अरुणकमल संस्था तद्रजःपुञ्जवर्णा।**
**करकमल धृतेष्ठा भीतियुग्माम्बुजा च ॥**
**मणि मुकुट विचित्रालंकृता कल्पजालैः ।**
**भवतु भुवनमाता सन्ततं श्री श्रियै नः ॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः ध्यानं समर्पयामि)

(महालक्ष्मी जी के चरणों में अक्षत्, पुष्प चढ़ायें)

## चन्दनम्

**ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।**
**विलेपनं सुरश्रेष्ठ चन्दनं प्रति गृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः चन्दनम् समर्पयामि)

(लक्ष्मी जी के मस्तक में चन्दन लगायें)

## पुष्पम्

**ॐ सुरभिः पुष्पनिचयैः ग्रथितां शुभमालिकाम् ।**
**ददामि तव शोभार्थं गृहाण परमेश्वरि॥**

(ॐ भूर्भुवः स्वः श्री लक्ष्मी देव्यै नमः पुष्पम् समर्पयामि)

(लक्ष्मी जी के चरणों में पुष्प चढ़ायें)

## धूपम्

**ॐ दशाङ्गगुग्गुलं धूपं चन्दनागरुसंयुतम् ।**
**समर्पितं मया भक्त्या महादेवि प्रगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः धूपम् आघ्रापयामि)

(लक्ष्मी जी को धूप दिखायें)

## दीपम्

**ॐ घृतवर्तिसमायुक्तं महातेजो महोज्ज्वलम् ।**
**दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा ॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः दीपम् दर्शयामि)

(लक्ष्मी जी को दीप दिखायें)

## नैवेद्यम्

**ॐ अन्नं बहुविधं स्वादु रसैः षड्भिः समन्वितम् ।**
**नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः नैवेद्यम् निवेदयामि)

(एक पात्र में लक्ष्मी जी के सामने भोग रखें तथा खाली पात्र में तीन बार जल छोड़ें)

## प्रार्थयेत्

**( हाथ में अक्षत, पुष्प लेकर प्रार्थना करें )**

**ॐ सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मी सरस्वती ।**
**श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥**
**वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।**
**बालार्क कोटि प्रतिमां त्रिनेत्रां भजेहमाद्या जगदीश्वरींताम् ॥**

(ॐ भूर्भुवः स्वः श्री महालक्ष्म्यै नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि)

(लक्ष्मी जी के चरणों में अक्षत्, पुष्प चढ़ायें)

**अनेन पंचोपचार पूजनेन श्रीमहालक्ष्मी प्रीयतां न मम ॥**

(लक्ष्मी जी के चरणों में एक आचमनी जल चढ़ायें)

**॥ इति शुभम् भवतु ॥**